# Sharada Trishati

# શારદાત્રિશતી

## Document Information

Text title : Sharada Trishati

File name : shAradA300.itx

Category : shatI, devii, sarasvatI, devI, trishatI

Location : doc_devii

Author : Gangadharamakhin

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : July 14, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શારદાત્રિશતી

ગઙ્ગાધરમખિવિરચિતા ।
પરમાભરણં ધાતુર્વદનામ્ભોજસ્ય શારદા દેવી ।
યા રાજતિ જનની સા લસતુ સદા સુપ્રસન્ના નઃ ॥ ૧॥

સા શારદા પ્રસન્ના રાજતિ મમ માનસે નિત્યમ્ ।
યા શારદાબ્જવદના જનની કીર્ત્યા હિ સર્વલોકાનામ્ ॥ ૨॥

સમ્પદ્ દિવ્યા ધાતુઃ ખ્યાતા સા શારદા દેવી ।
યદ્ભજનં દેવાનામપિ તત્ત્વજ્ઞાનદં વિદુર્વિબુધાઃ ॥ ૩॥

સરસકવિતાવિભૂત્યૈ યત્પદમારાધ્યતે વિશેષજ્ઞૈઃ ।
સા શારદા શ્રિયૈ નઃ કાલે સર્વપ્રસન્નાત્મા ॥ ૪॥

નીલારવિન્દલોચનયુગલા સા શારદા દેવી ।
કરકમલકલિતવીણા સદા પ્રસન્ના શ્રિયૈઃ વઃ સ્યાત્ ॥ ૫॥

કલયે તામહમનિશં ફુલ્લાબ્જવિલોચનાં વાણીમ્ ।
યા સૃષ્ટ્યાદૌ સાહ્યં કલયતિ ધાતુર્જગન્માતા ॥ ૬॥

યસ્યા લીલાલોલઃ પદ્માસનગોઽપિ વેદપાઠરતઃ ।
તામહમતુલાનન્દપ્રાપ્ત્યૈ કલયે મનઃપદ્મે ॥ ૭॥

બ્રહ્માણં તાં વાણીમેકાસનભાસુરાં શ્રિયઃ પ્રાપ્ત્યૈ ।
આરાદ્વિલોક્ય માનસમાનન્દરસં પરં ભજતે ॥ ૮॥

મુક્તામયે વિમાને પદ્માસનયન્ત્રિકામધ્યે ।
દૃશ્યાં વાણીં દેવીં સેવે સન્તતસુખપ્રાપ્ત્યૈ ॥ ૯॥

ભાગ્યાન્મમ ચ કવીનાં સા દેવી દૃશ્યતામેતિ ।
વીણાપુસ્તકહસ્તા યા કમલાસનપુરન્ધ્રી હિ ॥ ૧૦॥

મામકમાનસકીરં બધ્નીયાશ્ચરણપઞ્જરે માતઃ ।

તેન મમ જન્મલાભઃ સ્તોત્રં ચ તવ પ્રકામકલિતાર્થમ્ ॥ ૧૧॥

સંવિત્પ્રરોહકલિકાપ્રાપ્ત્યૈ તાં નૌમિ શારદાં દેવીમ્ ।
યા કિલ કવીશ્વરાણામધિનેત્રી કાવ્યકલનાદૌ ॥ ૧૨॥

ભક્તાનાં જિહ્વાગ્રં સિંહાસનમાદરાદ્ વાણી ।
કલયન્તિ નૃત્યતિ કિલ તતસ્તુ તન્નૂપુરનિનાદઃ ॥ ૧૩॥

મઞ્જુલક્વણિતિઝરીતિ પ્રગીયતે દિક્તટે રસિકૈઃ ।
પ્રાતઃફુલ્લપયોરુહમરન્દરસકેલિધૂર્વહા કાલે ॥ ૧૪॥

દુર્વારગર્વદુર્મતિદુરર્થનિરસનકલાનિપુણાઃ ।
માતસ્તવ પાદયોરુહસેવાધન્યતાં પ્રાપ્તાઃ ॥ ૧૫॥

નીચા મમ તુ મનીષા તથાપિ તવ નુતિકલાપ્રવૃત્તોઽસ્મિ ।
અમ્બ તવ તત્ર હેતુઃ કૃપાં પરં બુદ્ધિદા જયતિ ॥ ૧૬॥

વિધિદયિતે તવ માતઃ સ્તુતૌ ન શક્તા અપિ ત્રિદશાઃ ।
ક્ષન્તવ્યમત્ર દયયા મમ ચાપલ્યં તવ સ્તોત્રે ॥ ૧૭॥

શુકવાણીમિવ માતર્નિરર્થકાં મદ્વચોભઙ્ગીમ્ ।
સદસિ શ‍ૃણોષિ દયયા તત્ તવ ચોત્તમપદવ્યક્ત્યૈ ॥ ૧૮॥

પરદેવતે પ્રસીદ પ્રાણેશ્વરિ ધાતુરમ્બ મમ વાણીમ્ ।
કૃપયા તવ નુતિયોગ્યાં ત્વન્નૂપુરનિનદરમ્યરસગુમ્ફામ્ ॥ ૧૯॥

સર્વજ્ઞત્વં સમ્પદમથવાન્યાં પ્રાપ્તુમત્ર તવ માતઃ ।
તવ ચરણકમલમેતચ્છરણં નાન્યા ગતિર્દૃષ્ટા ॥ ૨૦॥

મન્દધિયા સ્વલ્પાપિ સ્તુતિરમ્બ નિરર્થકાપિ રસહીના ।
કલિતા ચેત્ તવ કૃપયા તદેવ સદસીડિતં ભાતિ ॥ ૨૧॥

કુણ્ઠીકરોતુ વિપદં ચાજ્ઞાનં દુર્ગતિં વાણિ ।
તવ ચરણકમલસેવાદરો જનાનાં કલૌ કાલે ॥ ૨૨॥

વીરશ્રીર્વિદ્વચ્છ્રીર્જયશ્રિયો વામરૈર્માન્યે ।
તવ પાદામ્બુજસેવાદરેણ સિધ્યન્તિ નાન્યથા લોકે ॥ ૨૩॥

કરુણારસવર્ષિણિ તે ચરણસરોજદ્વયં નિધેહિ મમ ।
મસ્તકતલે વિદારિતજરાદિકં સપદિ જન્મ સાર્થં મે ॥ ૨૪॥

શ્રદ્ધાં મેધાં સમ્પદમન્યામમરેન્દ્રમાનનીયાં હિ ।
દયયા વિધેહિ કાલે ભક્તાનાં નસ્ત્વદેકશરણાનામ્ ॥ ૨૫॥

પ્રેયસિ ધાતુર્જગતાં પરમેશ્વરિ વાણિ માતરમ્બ નનુ ।
તવ નામાનિ ફણન્તસ્ત્રિદશૈઃ સહ યાન્તિ યાનેન ॥ ૨૬॥

તવ નામ યસ્ય જિહ્વાઙ્ગણે વિશુદ્ધં ક્ષણં સ્ફુરતિ ।
સ હિ વન્દ્યસ્ત્રિદશૈરપિ વિગલિતપાપઃ પરે લોકે ॥ ૨૭॥

નતનાકીશ્વરવનિતામૌલિસ્રગ્ગલિતમકરન્દૈઃ ।
સ્નિગ્ધપદામ્બુજયુગલા વાણી દેવી શ્રિયો હિ લસતિ પરા ॥ ૨૮॥

વિદુષામપિ તુષ્ટિકરં નવનવરસગુમ્ફનં કવિત્વં તુ ।
યત્કરુણાવીક્ષણતો સિધ્યતિ તાં શારદાં વન્દે ॥ ૨૯॥

અમ્બ પ્રસીદ પરમં માયામેતાં નિરસ્ય નતિભાજઃ ।
મમ સંવિધેહિ મધુરાં વાચં તવ નુતિકલાર્હાં ચ ॥ ૩૦॥

વાણી માતા જગતાં વાણીપુસ્તકકરામ્ભોજા ।
હંસાશ્રિતા હિ નમતાં શ્રેયઃસિધ્યૈ પ્રસન્ના નઃ ॥ ૩૧॥

શ્લાઘ્યા સમ્પત્કાલે વૈદુષ્યં વા યદીયવીક્ષણતઃ ।
સિધ્યન્ત્યપિ દેવાનાં તાં વન્દે શારદાં દેવીમ્ ॥ ૩૨॥

વિદ્યાદાનકરીયં કમલાસનપુણ્યપરિપાકઃ ।
મમ મનસિ સંનિધત્તાં દિવ્યજ્ઞાનાદિસિધ્યૈ હિ ॥ ૩૩॥

દિવ્યજ્ઞાનં દયયા વિધેહિ માતર્મહાસારમ્ ।
તેનૈવ તે તુ કીર્તિર્દાનફલં નશ્ચ જન્મસાફલ્યમ્ ॥ ૩૪॥

દ્વાદશબીજાક્ષરગાં મન્ત્રોદ્ધારક્રિયાશક્તિમ્ ।
વાણીં વિધેસ્તુ પત્નીં મધ્યે પશ્યામિ બિમ્બમધ્યસ્થામ્ ॥ ૩૫॥

રવિકોટિતેજસં તાં સરસ્વતીં ત્ર્યક્ષરક્રિયાશક્તિમ્ ।
અણિમાદિદાં પ્રસન્નામમ્બાં પશ્યામિ પદ્મમધ્યગતામ્ ॥ ૩૬॥

જગદીશ્વરિ ભારતિ મે પ્રસીદ વાણિ પ્રપન્નાય ।
અહમપિ કુતુકાત્ તવ નુતિકલનેઽશક્તશ્ચ મન્દધિષણશ્ચ ॥ ૩૭॥

મુનિજનમાનસપેટીરત્નં ધાતુર્ગૃહે રત્નમ્ ।
વાણીતિ દિવ્યરત્નં જયતિ સદા કામધુક્ કાલે ॥ ૩૮॥

અજ્ઞાનવ્યાધિહરં તદૌષધં શારદારૂપમ્ ।
યઃ પશ્યતિ સ હિ લોકે પરાત્મને રોચતે કાલે ॥ ૩૯॥

કમલાસનનયનફલં સૃષ્ટ્યાદિકલાસમાસક્તમ્ ।
વાણીરૂપં તેજઃ સ્ફુરતિ જગચ્છ્રેયસે નિત્યમ્ ॥ ૪૦॥

હંસગતિં તામમ્બામમ્ભોરુહલોચનાં વન્દે ।
તિલકયતિ યા ગુરૂણાં જિહ્વાસિંહાસનં વાણી ॥ ૪૧॥

વાણિ તરઙ્ગય લોચનવીક્ષણશૈલીં ક્ષણં મયિ ભોઃ ।
મમ જન્મ લબ્ધવિભવં તેન ભવેન્નૈવ તે હાનિઃ ॥ ૪૨॥

પદ્માસનેન સાકં કાલે વાણી સમાસના જયતિ ।
કુચકલશનમિતદેહા કુર્વન્તી ભદ્રસન્તતિં નમતામ્ ॥ ૪૩॥

વ્યાતન્વાના વાણી કવીશ્વરાણાં મનોજ્ઞવચનઝરીમ્ ।
જયતિ વિધિસુકૃતસન્તતિપરિણમિતમાલા બુધૈર્વન્દ્યા ॥ ૪૪॥

કમલસુષમાઙ્ગયષ્ટિઃ સા દેવી જયતિ પદ્મમધ્યતલે ।
શતબીજાક્ષરલસિતં દિક્પતિકૃતરક્ષકં ચ મેરુમુખમ્ ॥ ૪૫॥

વાણીયન્ત્રં વિબુધૈર્માન્યં યોગાસનાબ્ધીન્દુમ્ ।
હ્રીમક્ષરમુખમાદ્યં પ્રાક્તટકલિતં ચ પદ્મમધ્યતલે ॥ ૪૬॥

તન્મેરુચક્રરૂપં સમાધિદૃશ્યં ચ લોકવેદ્યં ચ ।
સૈષાશ્રિત્ય તદેતદ્ રાજતિ રાજીવલોચના વાણી ॥ ૪૭॥

હંસાશ્રિતગતિવિભવા મન્દસ્મેરા તમોનિહન્ત્રી ચ ।
મધુરતરવાઙ્નિગુમ્ફા વીણાપુસ્તકકરામ્ભોજા ॥ ૪૮॥

વીણાવાદનરસિકા નમતામિષ્ટાર્થદાયિની વાણી ।
ધાતુર્નયનમહોત્સવકલિકા કુર્યાચ્છુભં જગતામ્ ॥ ૪૯॥

તાપિઞ્છરમ્યદેહશ્રીરેષા કવિસમાજનુતા ।
અષ્ટૈશ્વર્યાદિકલાદાને દત્તેક્ષણા જયતિ ॥ ૫૦॥

સૃષ્ટ્યાદૌ વિધિલિખિતં વાણી સૈષા હિ ચાન્યથાકર્તુમ્ ।
નાકૌકસામપીહ પ્રભવતિ કલિતપ્રણામાનામ્ ॥ ૫૧॥

યઃ પશ્યતિ તામેતાં વાણીં પુરુષો હિ ધન્યતામેતિ ।

યં પશ્યતિ સૈષાયં નિતરાં ધન્યો નૃપેડિતઃ કાલે ॥ ૫૨॥

કબલિતતમઃસમૂહા વાણી સૈષા હિ વિજયતે જગતિ ।
અપુનર્ભવસુખદાત્રી વિરિઞ્ચિમુખલાલિતા કાલે ॥ ૫૩॥

કમલાસનમુખકમલસ્થિરાસનાં શારદાં વન્દે ।
યન્નામોચ્ચરણકલાવિભવાત્ સર્વજ્ઞતા નિયતમ્ ॥ ૫૪॥

ભવપરમૌષધમેતદ્વાણીરૂપં સદારાધ્યમ્ ।
કમલાસનલોચનગણસરસક્રીડાસ્પદં જયતિ ॥ ૫૫॥

નારીવંશશિખામણિરેષા ચિન્તામણિર્નતાનાં હિ ।
ધાતૃગૃહભાગધેયં ધ્યેયં સદ્ભિઃ શ્રિયઃ સમૃદ્ધ્યૈ નઃ ॥ ૫૬॥

જનનિ ભુવનેશ્વરિ ત્વાં વાણીં વન્દે કવિત્વરસસિદ્ધ્યૈ ।
ત્વં તુ દદાસિ હિ દયયા મમ મન્દસ્યાપિ વાગ્ઝરીર્મધુરાઃ ॥ ૫૭॥

એતેન તવ તુ કીર્તિર્મહિમા સઙ્ગીયતે દિશાં વલયે ।
કિંનરવર્ગૈરમરીકન્યાભિઃ કલ્પવૃક્ષમૂલતલે ॥ ૫૮॥

કવિમલ્લસૂક્તિલહરીસ્તન્વાના શારદા જયતિ ।
વિધિકેલિસદનહંસી કલ્યાણૈકસ્થલી નમતામ્ ॥ ૫૯॥

સ્ફુરતુ મમ વચસિ વાણિ ત્વદીયવૈભવસુધાધારા ।
નિત્યં વ્યક્તિં પ્રાપ્તા ધુતનતજનખેદજાલકા મહતી ॥ ૬૦॥

વાણિ તવ સ્તુતિવિષયે બુદ્ધિર્જાતા હિ મે સહસા ।
તેન મમ ભાગદેયં પરિણતિમિત્યેવ નિત્યસન્તુષ્ટઃ ॥ ૬૧॥

સૃષ્ટિકલામણ્ડનભૂરેષા વાણી જગજ્જનની ।
આલોકમાત્રવશતસ્તમસો હન્ત્રી ચ સમ્પદાં જનની ॥ ૬૨॥

પૌરુષલોપવિધાત્રી ધાતુરિયં કમલકોમલાઙ્ગલતા ।
વસતુ સદા જિહ્વાગ્રે દિવ્યજ્ઞાનપ્રદા દેવી ॥ ૬૩॥

પ્રતિદિનદુરિતનિહન્ત્રી પદ્માસનનયનપુણ્યપરિપાકઃ ।
કવિતાસન્તાનકલાબીજઙ્કુરવર્ધિની જયતિ ॥ ૬૪॥

ક્ષણવીક્ષણેન માતા લક્ષ્મીં પક્ષ્મલયતિ પ્રણતે ।
વેધસિ સુરતમહોત્સવસઙ્કેતતલપ્રદર્શિની કાલે ॥ ૬૫॥

શૃઙ્ગારવિભ્રમવતા નીલોત્પલકાન્તિચાતુરીસુપુષા ।
વાણીનેત્રેણ વિધિર્જિતોઽભવત્ સોઽપિ સતતકૃતવેદઃ ॥ ૬૬॥

શ્યામા કટાક્ષલહરી માતુર્જયતીહ સમ્પદાં જનની ।
યામસ્તૌષીત્ કાલે મઘવા નાકાધિપા મુનયઃ ॥ ૬૭॥

મણિકટકનાદપૂરિતમમ્બાપાદામ્બુજં મહામન્ત્રૈઃ ।
જપ્યં ધ્યેયં કાલે દિશિ દિશિ કલિતસ્વરક્ષં ચ ॥ ૬૮॥

સ્મરણેન દુરિતહન્ત્રી નમનેન કવિત્વસિદ્ધિદા વાણી ।
કુસુમસમર્પણકલયા કાલે મોક્ષપ્રદાત્રી ચ ॥ ૬૯॥

વિસૃમરતમોનિહન્ત્રિ ત્વાં સેવે શારદાદેવિ ।
શિશિરીકુરુ માં કાલે કરુણારસવીક્ષિતેન વરદેન ॥ ૭૦॥

માતર્નમોઽસ્તુ તાવકકટાક્ષમધુપાય શારદે જયતિ ।
યો વેધસોઽપિ કાલે સૃષ્ટ્યાદૌ ચાતુરીં દિત્સન્ ॥ ૭૧॥

સુમનોવાઞ્છાદાને કૃતાવધાનં ધનં ધાતુઃ ।
ધિષણાજાડ્યાદિહરં યદ્વીક્ષણમામનન્તિ જગતિ બુધાઃ ॥ ૭૨॥

લલિતગમનં ત્વદીયં કલનૂપુરનાદપૂરિતં વાણિ ।
નૌમિ પદામ્બુજયુગલં કવિતાસિદ્ધ્યૈ વિધેઃ કાન્તે ॥ ૭૩॥

કમલકૃતવૈજયન્તી વિધેર્મુખેષ્વાદરાદ્વાણ્યાઃ ।
જયતિ કટાક્ષલહરી તોરણલક્ષ્મીસ્તુ સત્યલોકે હિ ॥ ૭૪॥

નિશ્રેણિકા ચ મુક્તેઃ સજ્જ્ઞાનનદીમહાલહરી ।
નાનારસચાતુર્યપ્રસારિકા દુરિતશઙ્કુલા કાલે ॥ ૭૫॥

પરતન્ત્રિતવિધિવિભવા દેવી સા શારદા જયતિ ।
કૈવલ્યાદિકલાનાં દાત્રી ભક્તાલિકામધેનુર્યા ॥ ૭૬॥

કવિકામધેનુરેષા મઞ્જુસ્મેરાનનામ્ભોજા ।
વાણી જયતિ વિધાતુર્મનનાગમસમ્પ્રદાયફલદા હિ ॥ ૭૭॥

ઘનતરકૃપારસાર્દ્રૈર્નાનાવિભવપ્રદાનકૃતદીક્ષૈઃ ।
વાણી જયતિ કટાક્ષૈર્નઃ કાશ્મલ્યં હઠાન્નિરસ્યન્તી ॥ ૭૮॥

દાસાશાદાનકલાપ્રક્લૃપ્તદીક્ષાકટાક્ષલહરી મે ।
કબલયતુ પાપરાશિં વાણ્યા નિત્યં મહૌદાર્યા ॥ ૭૯॥

આદિમજનની સૈષા વાણી જયતીહ ભક્તરક્ષાયૈ ।
સર્વત્ર કલિતદેહા નાનાશાસ્ત્રાદિરૂપતો જગતિ ॥ ૮૦ ॥

બહુવિધલીલાસદનં સમ્ભૃતફુલ્લાબ્જશિલ્પવૈચિત્ર્યમ્ ।
વાણીમુખારવિન્દં ચુમ્બતિ માનસમિદં હઠાત્ કૃત્યમ્ ॥ ૮૧ ॥

સૌભાગ્યકાન્તિસારં વદનામ્ભોજં શ્રિયૈ વાણ્યાઃ ।
આશ્રિત્ય સકલવેદા અપિ નિત્યં માન્યતાં પ્રાપ્તાઃ ॥ ૮૨ ॥

જ્ઞાનમયી સલિલમયી તત્ત્વમયી ભાતિ સર્વલોકાનામ્ ।
અક્ષરમયી ચ વાણી શ્રેયોદાને નિબદ્ધચિત્તગતિઃ ॥ ૮૩ ॥

નમૌક્તિરસ્તુ માત્રે વાણ્યૈઃ નઃ સિદ્ધિદા ભક્ત્યા ।
આનન્દિન્યૈ જ્ઞાનસ્વરૂપભાજે પ્રબન્ધરૂપાયૈ ॥ ૮૪ ॥

આરાધ્યાયૈ ધ્યેયાયૈ ચાત્તકલાચિત્રનાદરૂપાયૈ ।
સચ્ચિત્તવાસભાજે વાણ્યૈ ભૂયો નમોઽસ્તુ ભક્તિકૃતમ્ ॥ ૮૫ ॥

કમલાસનપુણ્યકલા નમતાં ચિન્તામણિર્વાણી ।
જીવાક્ષરબોધકલારૂપા જયતીહ સત્ત્વરૂપવતી ॥ ૮૬ ॥

બ્રહ્માણ્ડમણ્ડલમિદં વ્યાપ્તં માત્રા ક્ષરાક્ષરાદિજુષા ।
યત્પદકમલં નિત્યં શ્રુતિતતિસુદતીવિભૂષણં ચ વિદુઃ ॥ ૮૭ ॥

મનસિજસામ્રાજ્યકલાલક્ષ્મીરેષા વિરિઞ્ચિમુખહર્ષમ્ ।
વ્યાતન્વાના નિત્યં રાજતિ ષડરસ્વરૂપચક્રતલે ॥ ૮૮ ॥

મઞ્જુલવીણાનિનદપ્રયોગનિર્ધૂતમોહસઞ્ચારા ।
હંસીયાના વાણી હંસગતિઃ સુકૃતિનેત્રપુણ્યકલા ॥ ૮૯ ॥

કુચકલશસવિધવિનિહિતવીણાનિક્કાણસાવધાનકલા ।
અધિનેત્રી હિ કલાનાં સકલાનાં શારદા જયતિ ॥ ૯૦ ॥

ત્રિદશપરિષન્નિષેવ્યા પ્રાતઃ સાયં પ્રફુલ્લમુખકમલા ।
કમલાસ્નુષા હિ વાણી વાણીં દિશતુ પ્રબન્ધરસભરિતામ્ ॥ ૯૧ ॥

અધિકચપલૈઃ કટાક્ષૈરઞ્ચિતલીલારસૈરુદારૈર્નઃ ।
મઙ્ગલમાતન્વાના વિધાતૃગૃહિણી સુરાદિનુતપાદા ॥ ૯૨ ॥

કાન્તં લક્ષ્મીભવનં મુખકમલં શારદાદેવ્યાઃ ।

સૌભાગ્યકાન્તિસારં સ્પૃહયતિ મે માનસં સરસમ્ ॥ ૯૩॥

કારુણ્યપૂર્ણનયનં પુસ્તકહસ્તં મહઃ કિમપિ ।
ધાતુઃ પુણ્યકલાનાં પરિપાકો મર્ત્યરક્ષણં કુરુતે ॥ ૯૪॥

સંસારવારિરાશિં તર્તું સા સેતુરેષા નઃ ।
ધાતુર્ગૃહિણી દુઃખં શિથિલયતુ પરં જનિપ્રાપ્તમ્ ॥ ૯૫॥

સરસકવિકલ્પવલ્લીમમ્બાં વાણીમહમુપાસે ।
અન્તસ્તમોનિહન્ત્રીં યામાહુર્જ્ઞાનદાં મુનયઃ ॥ ૯૬॥

મમ લોચનયોર્ભૂયાત્ વિદ્યા કાપિ પ્રધૂતજનિભીતિઃ ।
નિગમેષુ સઞ્ચરન્તી કૃપાનિધિઃ શારદા દેવી ॥ ૯૭॥

શમિતનતદુરિતસઙ્ઘા ધાત્રે નિજનેત્રકલ્પિતાનઙ્ગા ।
કૃતસુરશાત્રવભઙ્ગા સા દેવી મઙ્ગલૈસ્તુઙ્ગા ॥ ૯૮॥

પદ્માસનસ્થિતાં તાં વાણીં ચતુરાનનાં વન્દે ।
કલ્યાણાનાં સરણિં કવિપરિષત્કલ્પવલ્લરીં માન્યામ્ ॥ ૯૯॥

કુચભારસંનતાઙ્ગીં કુન્દસ્મેરાનનામ્ભોજામ્ ।
કુન્દલકુસુમપરિમલસમ્પાદિતભૃઙ્ગઝઙ્કૃતિતરઙ્ગામ્ ॥ ૧૦૦॥

ચિદ્રૂપાં વિધિમહિષીં હંસગતિં હંસસંનુતચરિત્રામ્ ।
વિદ્યાકલાદિનિલયામારાધ્યાં સકલજડિમદોષહરીમ્ ॥ ૧૦૧॥

જનનિ યદિ ભજતિ લોકે તવ લોચનવીક્ષણં ક્ષણં મર્ત્યઃ ।
કુપુરુષનુતિવિમુખસ્તે રૂપં જ્ઞાનપ્રદં પશ્યન્ ॥ ૧૦૨॥

કુક્ષિમ્ભરિત્વમુખદુર્ગુણાદિકં દૂરતસ્ત્યક્ત્વા ।
ત્વદ્ભાવનેન ધન્યો નયતિ ચ કાલં પ્રમોદેન ॥ ૧૦૩॥

મયિ તાપભારશાન્ત્યૈ તરઙ્ગય ત્વદિલોચને માતઃ ।
યચ્છારદાબ્જસુષમામાન્યે દેવાદિભિઃ પ્રાર્થ્યે ॥ ૧૦૪॥

સર્વાર્થદા હિ ભજતાં કટાક્ષધાટી શિવઙ્કરી વાણિ ।
ચિન્તામણિમિવ કલયતિ યાં હિ વિધિર્વિદિતમન્ત્રોઽપિ ॥ ૧૦૫॥

સુકૃતપરિપાકમાનસા ધન્યાસ્ત્વામર્ચયન્તિ નનુ વાણિ ।
અહમપિ તદ્વત્ફલયે ફલપ્રદા ત્વં સમાનકલ્પાસિ ॥ ૧૦૬॥

નિગમવચસાં નિદાનં તવ પાદાબ્જં વતંસયતુ કાલે ।
દેવોऽપિ દેવદેવો વિજિતજગત્ત્રયતલે માતઃ ॥ ૧૦૭॥

અન્તસ્તમસો હન્ત્રી પટીયસી તે કટાક્ષઝરમાલા ।
યા તોરણમાલ્યશ્રિયમાતનુતે વેધસઃ સૌધે ॥ ૧૦૮॥

શ‍ૃઙ્ગારવિભ્રમવતીં ત્વાં પ્રાપ્યૈવ ક્રિયાકાલે ।
કલયતિ સૃષ્ટ્યાદિમસૌ વિધિઃ શ્રુતિવ્યક્તમાહાત્મ્યઃ ॥ ૧૦૯॥

વેધોવદનં કેલીવનમાસાદ્યામ્બ પરમયા હિ મુદા ।
ક્રીડસિ શુકીવ કાલે દ્વિજસઙ્ઘસમર્ચિતાત્મવૃત્તિશ્ચ ॥ ૧૧૦॥

ધાતુર્મુખમઞ્જૂષારત્નં નિગમાન્તકેલિવનહંસીમ્ ।
પરમાં કલામુપાસે તામમ્બાં ચિદ્વિલાસઘનવૃત્તિમ્ ॥ ૧૧૧॥

વાગીશદેવરૂપિણિ ગીષ્પતિમુખદેવસઙ્ઘનુતચરણે ।
તવ રૂપં સૂર્યાયુતદૃશ્યં દર્શય મમ જ્ઞાને ॥ ૧૧૨॥

દિવ્યજ્ઞાનપ્રદમિદમમ્બ ત્વદ્રૂપમાદરાદ્વાણિ ।
કાલે દર્શય કૃપયા તેન વયં પ્રાપ્તકાર્યસાફલ્યાઃ ॥ ૧૧૩॥

અમ્બા ત્રિસન્ધ્યપઠનપ્રવૃત્તિભાજાં ક્રમેણ નામ્નાં તુ ।
દ્વાદશકલાવિભેદવ્યૂહાદિજ્ઞાનદા પ્રસન્ના હિ ॥ ૧૧૪॥

મૂકોऽપિ સત્કવિઃ સ્યાદ્ દુરક્ષરાણ્યપિ વિધાતૃલિખિતાનિ ।
સત્ફલદાનિ સરસ્વતિ કટાક્ષપૂરે યદિ કાપિ ॥ ૧૧૫॥

અવલમ્બે તામમ્બાં પઞ્ચાશદ્વર્ણકલ્પિતજગત્કામ્ ।
સૃષ્ટિસ્થિતિસંહારસ્થિરોદયાં વિવિધશાસ્ત્રરૂપાઢ્યામ્ ॥ ૧૧૬॥

વાણીં દિશતુ મનોજ્ઞાં વાણી ગતિહસિતકાદમ્બા ।
યા દમ્ભાદિવિમુક્તા નાદં ભાવ્યં વદન્તિ યદ્રૂપમ્ ॥ ૧૧૭॥

રાકેન્દુવદનબિમ્બા સામ્બા વાણી પુનાતુ કૃતિમેનામ્ ।
પરિકલિતભાવબન્ધાં રસોજ્જ્વલાં મઙ્ગલોત્તુઙ્ગામ્ ॥ ૧૧૮॥

લાવણ્યકાન્તિસિન્ધુઃ પાદાબ્જનતપ્રભાવસન્ધાત્રી ।
પ્રસૃમરતમોનિહન્ત્રી મદ્વાચાં દેવતા ચાદ્યા ॥ ૧૧૯॥

જનતાનેત્રાનન્દં રૂપં યસ્યાઃ સ્ફુટં ભાતિ ।
સ્મરણં ત્વજ્ઞાનહરં વિશ્વજ્ઞાનપ્રદં ચ સા જયતિ ॥ ૧૨૦॥

સહધર્મિણી વિધાતુર્દારિદ્ર્યધ્વંસિની નિજકટાક્ષૈઃ ।
સાંનિધ્યં જનયતુ મે સુરમુનિનરસંનુતસ્વમહિમેયમ્ ॥ ૧૨૧॥

મુખરિતવીણા વાણી વાણીં મે દિશતુ નૈજનુતિયોગ્યામ્ ।
આસ્વાદિતશાસ્ત્રામૃતલહરીં સદ્યસ્તમોનિહન્ત્રીં ચ ॥ ૧૨૨॥

મણિનૂપુરનાદનિભા વાણી ભાતિ ત્વદીયભક્તમુખે ।
કીર્તિર્દિશાસુ શુદ્ધિર્વપુષિ બહુમુખી પરં કાલે ॥ ૧૨૩॥

તવ પાદસ્મરણવશાત્ તામ્યતિ તિમિરાવલિશ્ચાન્તઃ ।
આનન્દલહરિવીચી પ્રસર્પતિ ક્ષમાતલે હિ ભક્તાનામ્ ॥ ૧૨૪॥

સમ્પન્નલિનીભાનું જ્ઞાનાબ્ધિસુધાકરં હિ તવ રૂપમ્ ।
ભક્ત્યા મનસિ ગૃણન્તો ગચ્છન્તિ વ્યોમયાનમારૂઢાઃ ॥ ૧૨૫॥

હૃત્તમસાં દીપરુચિર્વિધાતૃદયિતા મમાસ્તુ પરદૈવમ્ ।
ભવતાપમેઘમાલા કવિશુકવાસન્તિકશ્રીર્હિ ॥ ૧૨૬॥

મમ માનસમણિહર્મ્યે વિહરતુ વાણ્યાઃ સ્વરૂપં તુ ।
નિગમવચસાં નિગુમ્ફૈર્વેદ્યં તદ્વેધસા લાલ્યમ્ ॥ ૧૨૭॥

સતતમભિગમ્યરૂપા વિબુધવરેડ્યા સરસ્વતી માતા ।
મનસિ મમ સંનિધત્તાં ભૂત્યૈ નઃ સર્વતઃ કાલે ॥ ૧૨૮॥

મમ શિરસિ નીચપુણ્યે પુણ્યઘના વેદમૌલિહર્મ્યા ચ ।
કૃતપદવિન્યાસભરા વાણી જયતીહ શતમખાદિનુતા ॥ ૧૨૯॥

માયાનિરસનદક્ષા માતેયં સુપ્રસન્ના મે ।
લભતે પરમં જ્ઞાનં યદ્ભક્ત્યા પામરોઽપિ ચ ધરિત્ર્યામ્ ॥ ૧૩૦॥

વાણીશ્વરિ તવ રૂપં નામસ્મરણં ચ પૂજનં ભક્ત્યા ।
સિધ્યતિ સકલવિભૂત્યૈ તત્ર હિ ભવતીદયાપ્રસારસ્તુ ॥ ૧૩૧॥

સફલયતુ નેત્રયુગલં હતનતદુરિતા ચ સા પરા દેવી ।
કમલજમાન્યચરિત્રા સુમનોવાઞ્છાપ્રદાનકૃતદીક્ષા ॥ ૧૩૨॥

પઙ્કજમૃણાલતન્તુપ્રતિભટરૂપં ક્વચિદ્દૃશ્યમ્ ।
કવિકુલવાણીકૈરવશારદચન્દ્રપ્રભાકબલિતં ચ ॥ ૧૩૩॥

નલિનભવગૃહિણિ વાણિ પ્રજ્ઞાનાં સપદિ ભક્તાનામ્ ।

લુમ્પસિ મોહં ભવતીસ્મરણાદ્વરિવસ્યયા સ્તુત્યા ॥ ૧૩૪॥

કવિકુલકલ્પકવલ્લીમપાઙ્ગલીલાકૃતાર્તિશમનાં તામ્ ।
વાણીમન્વહમાર્યારાધ્યાં મોક્ષાય નિભૃતમહમીડે ॥ ૧૩૫॥

સંવિત્સુખસ્વરૂપામમ્બાં વાણીમહર્નિશં મનસિ ।
કલયે કલિતાપ્રભરપ્રશાન્તિકામઃ પ્રભાવતીં જયદામ્ ॥ ૧૩૬॥

નતપરિપાલિનિ વાણિ ત્રિજગદઘધ્વંસિનિ શ્રિતાનાં નઃ ।
તવ પાદયુગં નિગલં ભવતુ તમોરાશિદુષ્ટહસ્તિગણે ॥ ૧૩૭॥

કામાદિદુર્ગ્રહકૃતાનર્થનિરાસાય તાવકાપાઙ્ગાઃ ।
વાણિ જનયન્તિ નતાનાં કૈવલ્ય ખપ્રદાનાય ॥ ૧૩૮॥

તવ દર્શનં હિ માતઃ પરમં સંસ્કારમાત્તપાપાનામ્ ।
કલ્યાણસૂક્તિકન્દલરસપ્રદં માન્યતે વિબુધૈઃ ॥ ૧૩૯॥

ધાતુર્વદનસરોજે શ્રુતિસીમનિ હૃદિ ચ ભક્તાનામ્ ।
એકપદા દ્વિપદા વા રાજતિ વાણી જગન્માતા ॥ ૧૪૦॥

મણિમયકાઞ્ચીલસિતા વીણાપુસ્તકકરારવિન્દા ચ ।
નમતાં જાડ્યવિધૂનનધૃતદીક્ષા રાજતે વાણી ॥ ૧૪૧॥

કબલયતુ તાપમસ્યાઃ સ્મરણં પાદાબ્જવન્દનં વાણ્યાઃ ।
ધાતુર્જિહ્વાગ્રતલે નૃત્યન્ત્યાઃ સારસૂક્તિરસયન્ત્યાઃ ॥ ૧૪૨॥

પદ્મજવદનવિભૂષા નિગમશિખોત્તંસપીઠિકા વાણી ।
સકલવિધશાસ્ત્રરૂપા ભક્તાનાં સત્કવિત્વદાનપ્રા ॥ ૧૪૩ ॥ ।

ગતિજિતમરાલગમના મરાલવાહા ચ વેધસો દારાઃ ।
શિશિરદયાસારા સા નમતાં સન્તાપહારિણી સહસા ॥ ૧૪૪॥

સ્તનભારસંનતાઙ્ગી દરદલિતામ્ભોજલોચનાન્તશ્રીઃ ।
સવિધતલે વિબુધવધૂપરિચરણાદ્યૈશ્ચ તુષ્ટચિત્તા સા ॥ ૧૪૫॥

હરિણાઙ્કવદનબિમ્બા પૃથુલનિતમ્બા કચાત્તલોલમ્બા ।
નિજગતિજિતકાદમ્બા સામ્બા પદપદ્મનમ્રભક્તકદમ્બા ॥ ૧૪૬॥

પરિહસિતનીલનીરજદેહશ્રીઃ શારદા પ્રથમા ।
સ્ફટિકમણિભરકાન્તિઃ સરસ્વતી કીર્ત્યતે ચ વિબુધગણૈઃ ॥ ૧૪૭॥

નાથે દૃઢભક્તિમતી સૃષ્ટ્યાદૌ ચિત્સ્વરૂપા ચ ।
ધાત્રા સમાનભાવા ચૈકાસનપૂણ્ડરીકમધ્યસ્થા ॥ ૧૪૮॥

પ્રીત્યા સરસપુમર્થાન્ દદાતિ કાલે ચિદાદિસન્ધાત્રી ।
સા મે દૈવતમેષા સતતનિષેવ્યા ચ કામદા ભૂયાત્ ॥ ૧૪૯॥

હરિચરણનલિનયુગલે સદૈકતાના હિ શારદા જનની ।
પદ્માનીલાદિસખી શ્રુત્યુદ્યાને વિહારરસભરિતા ॥ ૧૫૦॥

ધાતુઃ કુટુમ્બિનીયં તન્યાત્ કલ્યાણસન્તતિં સતતમ્ ।
યા તારુણ્યવિભુષા સમક્રમા ત્રિપુરસુન્દર્યા ॥ ૧૫૧॥

નાનાક્ષરાદિમાતૃકગણેડિતા શબ્દરૂપા ચ ।
નાદબ્રહ્મવિલાસા વાણી સા મઙ્ગલાનિ નસ્તન્યાત્ ॥ ૧૫૨॥

દૃક્કોણવીક્ષણકલાનિગમપ્રાભવવિધાનદા નમતામ્ ।
વિબુધાનાં હૃદયાબ્જં યસ્યા વાસસ્થલી ચ નિર્દિષ્ટમ્ ॥ ૧૫૩॥

મોહાદિવનકુઠારા યા નિત્યં સેવ્યતે ત્રિદશસન્ઘૈઃ ।
નિત્યપ્રસન્નરૂપાં શાન્તાં યામેવ સેવતે વેધાઃ ॥ ૧૫૪॥

નમતાં યયૈવ ખણ્ડીક્રિયતે સુવર્ણદૃષ્ટિપુષા ।
યદ્વીક્ષણેન પુરુષઃ ખ્યાતો નૃપસદસિ માન્યતે પ્રથમમ્ ॥ ૧૫૫॥

યસ્યૈ શ્રોત્રિયવર્યૈસ્ત્રિસન્ધ્યમર્ઘાર્દિકં ક્રિયતે ।
સા મઞ્જુનીતિરૂપા વાણીરૂપા ચ ભણ્યતે નિપુણૈઃ ॥ ૧૫૬॥

સા મયિ તન્યાદીક્ષાં વીક્ષાવનદાં સરસ્વતી દેવી ।
સન્તાનકુસુમજૈત્રીં યામૈચ્છત્ પ્રામુમઞ્જસા વેધાઃ ॥ ૧૫૭॥

મન્દસ્મિતમધુરાસ્યં કૃપાવલોકં નિરસ્તજાદ્યતતિ ।
ભૂયાદ્ વાણ્યા રૂપં પુરઃ કરામ્ભોજકલિતવીણાદિ ॥ ૧૫૮॥

વાણ્યાઃ પરં ન જાને દૈવતમન્યદ્ વને ગિરૌ ચ પથિ ।
ગગને વા સંરક્ષિતનતજનતાયાઃ કૃપારસાર્દ્રાયાઃ ॥ ૧૫૯॥

આસ્યેન્દોરવલોકનમમ્બાયાઃ પાદપદ્મસેવા ચ ।
સર્વશ્રેયઃપ્રાપ્ત્યૈ શાસ્ત્રજ્ઞૈઃ સુષ્ઠુ નિર્દિષ્ટા ॥ ૧૬૦॥

વાણી હિ તાપહન્ત્રી જગતાં કારુણ્યપૂર્ણનયનશ્રીઃ ।
મન્દાન્ કરોતિ વિબુધાન્ દ્રાવયતિ શિલાસ્તતસ્તુ કિં ચિત્રમ્ ॥ ૧૬૧॥

યસ્મિન્ કટાક્ષપૂરો ન ભવતિ સ હિ દીનવદનઃ સન્ ।
પ્રસ્ખલિતવાગ્ભાર્તો ભિક્ષામટતીહ નિન્દિતો બહુશઃ ॥ ૧૬૨॥

વાણ્યાઃ કટાક્ષપૂરસ્રજા ત્વલઙ્કૃતનિગાલો યઃ ।
સ હિ ભવતિ રાજમાન્યઃ કાન્તાધરમધુરવાગ્વિલાસશ્ચ ॥ ૧૬૩॥

કવિતાભાગ્યવિધાત્રી પરિમલસઙ્ક્રાન્તમધુપગણકેશા ।
મમ નયનયોઃ કદા વા સા દેવી કલિતસંનિધાનકલા ॥ ૧૬૪॥

પરચિદ્વિધાનરૂપા વાણી શ્રુતિસીમ્નિ રાજતે પરમા ।
મુનિજનમાનસહંસી યા વિહરતિ સા શુભાય સ્યાત્ ॥ ૧૬૫॥

જપમાલિકયા વાણીકરધૃતયા વીણયા ચ કોશેન ।
અહમસ્મિ નાથવાનિહ કિં વાશાસ્યં પરં લોકે ॥ ૧૬૬॥

કૈવલ્યાનન્દસુખપ્રાપ્ત્યૈ તેજસ્તુ મન્મહે કિમપિ ।
યદ્ વાઞ્છિતચિન્તામણિરિતિ વાણીતિ ચ ભુવિ ખ્યાતમ્ ॥ ૧૬૭॥

કવિકુલસૂક્તિશ્રેણીશ્રવણાનન્દોલ્લસદ્ધતંસસુમા ।
સા દેવી મમ હૃદયે કૃતસાંનિધ્યા કૃતત્રાણા ॥ ૧૬૮॥

યસ્યા દૃષ્ટિવિદૂરાઃ કુમતાઃ શ્રુત્યર્થવઞ્ચકાઃ શપ્તાઃ ।
ક્રન્દન્તિ દિગન્તતટે મોહાદ્યૈર્લુપ્તનયનાશ્ચ ॥ ૧૬૯॥

સત્પરિષત્સંમાન્યા શ્રુતિજીવનદાયિની જગન્માતા ।
ચતુરાનનભાગ્યકલા કૃતસાંનિધ્યા હિ રાજતે હૃદયે ॥ ૧૭૦॥

કૃતસુકૃતૈઃ સન્દૃશ્યા મન્દસ્મિતમધુરવદનપદ્મશ્રીઃ ।
મુનિનારદાદિપરિષત્તત્ત્વોપક્રમવિચક્ષણા વાણી ॥ ૧૭૧॥

કવિવાગ્વાસન્તીનાં વસન્તલક્ષ્મીર્વિધાતૃદયિતા નઃ ।
પરમાં મુદં વિધત્તે કાલે કાલે મહાભૂત્યૈ ॥ ૧૭૨॥

કવિતારસપરિમલિતં કરોતિ વદનં નતાનાં યા ।
સ્તોતું તાં મે હ્યારાત્ સા દેવી સુપ્રસન્નાસ્તુ ॥ ૧૭૩॥

યસ્યાઃ પ્રસાદભૂમ્ના નાકિગણાઃ સત્ત્વસમ્પન્નાઃ ।
ઐન્દ્રીં શ્રિયમપિ માન્યાં પશ્યન્તિ ક્ષપિતશત્રુભયપીડામ્ ॥ ૧૭૪॥

માન્યં વિધાતૃલોકે તત્તેજો ભાતિ સર્વસુરવન્દ્યમ્ ।

બ્રહ્માણ્ડમણ્ડલમિદં યદ્રૂપં યત્ર ચાક્ષરગતિશ્ચ ॥ ૧૭૫॥

જનનિ તરઙ્ગય નયને મયિ દીને તે દયાસ્નિગ્ધે ।
તેન વયં કૃતાર્થા નાતઃ પરમસ્તિઃ નઃ પ્રાર્થ્યમ્ ॥ ૧૭૬॥

વાણિ વિધાતુઃ કાન્તે સ્તોતું ત્વામાદરેણ કિં વાચ્યમ્ ।
ભાસિ ત્વમેવ પરમં દૈવતમિત્યેવ જાનામિ ॥ ૧૭૭॥

કબલિતતમોવિલાસં તેજસ્તન્મન્મહે મહોદારમ્ ।
ફલિતસુમનોઽભિલાષં વાણીરૂપં વિપઞ્ચિકોલ્લસિતમ્ ॥ ૧૭૮॥

પદ્મસનસુકૃતકલાપરિપાકોદયમપાસ્તનતદોષમ્ ।
સરસજ્ઞાનકવિત્વાદ્યનન્તસુકૃતં વિરાજતે તેજઃ ॥ ૧૭૯॥

નિજનાથવદનસિંહાસનમારૂઢામુપાસ્મહે વાણીમ્ ।
યા કૃત્રિમવાગ્ગુમ્ફૈર્વિરચિતકેલિર્ધિનોતિ વિધિમાદ્યમ્ ॥ ૧૮૦॥

સુજનાનન્દકરી સા જનયન્તી સર્વસમ્પદં ધાતુઃ ।
ભક્તેષુ તાં નયન્તીમન્વહમહમાદ્રિયે ગિરાં દેવીમ્ ॥ ૧૮૧॥

કરુણાકટાક્ષલહરી કામાયાસ્તુ પ્રકામકૃતરક્ષા ।
વાણ્યા વિધાતૃમાન્યા સત્સુખદાને દિશિ ખ્યાતા ॥ ૧૮૨॥

વિસરો મહોત્સવાનાં વિરિઞ્ચિનયનાવલેરિયં માતા ।
પ્રિયકાર્યસિદ્ધિદાત્રી જગતીરક્ષાધુરન્ધરા જયતિ ॥ ૧૮૩॥

વિબુધાભિગમ્યરૂપા હંસાવલિસેવિતા ગિરાં દેવી ।
ગઙ્ગેવ કનતિ કાલે પરિકમ્પિતશિવજટાકોટિઃ ॥ ૧૮૪॥

નૌકાં ભવામ્બુરાશેરજ્ઞાનધ્વાન્તચન્દ્રિકાં વાણીમ્ ।
કલયે મનસિ સદાહં શ્રુતિપઞ્જરશારિકાં દેવીમ્ ॥ ૧૮૫॥

ભવતાપારણ્યતલે જહ્નુસુતા શારદા દેવી ।
જ્ઞાનાનન્દમયી નઃ સમ્પત્સિદ્ધ્યૈ પ્રતિક્ષણં જયતુ ॥ ૧૮૬॥

મત્તગજમાન્યગમના મધુરાલાપા ચ માન્યચરિતા સા ।
મન્દસ્મેરમુખાબ્જા વાણી મમ હૃદયસારસે લસતુ ॥ ૧૮૭॥

રક્ષણચણૌ ચ વાણ્યાઃ પાદૌ વન્દે મનોજ્ઞમણિનાદૌ ।
યત્સેવનેન ધન્યાઃ પુરુહૂતાદ્યા દિશાં નાથાઃ ॥ ૧૮૮॥

ધાતુર્ધૈર્યકૃપાણી વાણી સુરવૃક્ષકુસુમમૃદુવેણી ।
શુકવાણી નુતવાણી કવિકુલમોદાય જયતિ મૃદુવાણી ॥ ૧૮૯॥

કલ્યાણૈકનિકેતનમસ્યા રૂપં સદા સ્ફુરતુ ચિત્તે ।
માનસકાલુષ્યહરં મધુમથનશિવાદિબહુમતોત્કર્ષમ્ ॥ ૧૯૦॥

મુનિજનમાનસરત્નં ચિરત્નમેતદ્વિધાતૃસુકૃતકલા ।
વિનતજનલોચનશ્રીકર્પૂરકલા પરા જયતિ ॥ ૧૯૧॥

ધૃતસુમમધુપક્રીડાસ્થાનાયિતકેશભારાયૈ ।
નમ ઉક્તિરસ્તુ માત્રે વાઞ્જિતપીયૂષધારાયૈ ॥ ૧૯૨॥

બાલકુરઙ્ગવિલોચનધાટીરક્ષિતસુરાદિમનુજાનામ્ ।
નયનયુગાસેવ્યં તદ્ભાતીહ ધરાતલે તેજઃ ॥ ૧૯૩॥

કુશલવિધયે તદસ્તુ શ્રુતિપાઠરતાદૃતાત્મબહુકેલિઃ ।
કબલિતપદનતદૈન્યં તરુણામ્બુજલોચનં તેજઃ ॥ ૧૯૪॥

બાલમરાલીગત્યૈ સુરગિરિકન્યાદિમહિતકલગીત્યૈ ।
વિરચિતનાનાનીત્યૈ ચેતો મે સ્પૃહયતે બહુલકીર્ત્યૈ ॥ ૧૯૫॥

વિનમદમરેશસુદતીકચસુમમકરન્દધારયા સ્નિગ્ધમ્ ।
તવ પાદપદ્મમેતત્ કદા નુ મમ મૂર્ધ્નિ ભૂષણં જનનિ ॥ ૧૯૬॥

કમલજપરતન્ત્રં તદ્ગતતન્દ્રં વસ્તુ નિસ્તુલમુપાસે ।
તેનૈવાહં ધન્યો મદ્વંશ્યા નિરસિતાત્મતાપભરાઃ ॥ ૧૯૭॥

જ્ઞાનામૃતસન્ધાત્રી ભવાબ્ધિસન્તરણપોત્રનામાદિઃ ।
વાણી વાચાં લહરીમવન્ધ્યયન્તી સુરાદિનુતચરિતા ॥ ૧૯૮॥

કારુણ્યપૂર્ણમેતદ્ વાણીરૂપં સદા કલયે ।
યદ્ભજનાદ્ દેવાનામપિ સંવિદ્ ભાતિ કાર્યકાલેષુ ॥ ૧૯૯॥

ધીપદ્મપીઠમાસ્તે સા વાણી કાઙ્ક્ષિતાનિ કલયન્તી ।
યા ઘનકૃપાસ્વરૂપા સઙ્કીર્ત્યા સર્વદેવનુતા ॥ ૨૦૦॥

તવ પાદપદ્મવિસૃમરકાન્તિઝરીં મનસિ કલયંસ્તુ ।
નિરસિતનરકાદિભયો વિરાજતે નાકિસદસિ સુરમાન્યઃ ॥ ૨૦૧॥

કુચયુગલનમ્રગાત્રં પવિત્રમેતદ્ ભજે તેજઃ ।
ધાતુરપિ સર્વદૈવૈર્યન્નિર્દિષ્ટં હુ ભદ્રાય ॥ ૨૦૨॥

કૃતનતપદવાગ્ધાટી ચેટીભૂતામરેશમહિષી નઃ ।
કટિકૃતમનોજ્ઞશાટી પાટીરરસાર્દ્રનૈજતનુકોટી ॥ ૨૦૩॥

પદ્મભવપુણ્યકોટી હર્ષિતકવિવૃન્દસૂક્તિરસધાટી ।
મુખલસિતસરસવાટી વિલસતુ મમ માનસે કૃપાકોટી ॥ ૨૦૪॥

જ્ઞાનપરાક્રમકલિકા દિશિ દિશિ કિન્નરસુગીતનિજયશસઃ ।
ધન્યા ભાન્તિ હિ મનુજાઃ યદ્વીક્ષાલવવિશેષતઃ કાલે ॥ ૨૦૫॥

સુરજનપાલનદક્ષા પ્રશાન્તવીક્ષા નિરસ્તરિપુપક્ષા ।
મોક્ષાર્થિભિઃ શ્રિતા સા લાક્ષારસલસિતપાદભાગ્ ભાતિ ॥ ૨૦૬॥

કુઙ્કુમભરરુચિરાઙ્ગી ભાતિ કૃશાઙ્ગી ગિરાં દેવી ।
ધાતુરપિ જ્ઞાનપ્રદમસ્યા રૂપં વદન્તિ વિબુધેશાઃ ॥ ૨૦૭॥

વાણિ નતિમમ્બ નિત્યં કરવાણિ હિ ચિત્સુખાવાપ્ત્યૈ ।
તાદૃક્ત્વદીયકરુણાવીક્ષણતો ગીષ્પતિશ્ચ સુરમાન્યઃ ॥ ૨૦૮॥

કલ્યામિ નતિમનન્તાં કાલે કાલે શુભપ્રાપ્ત્યૈ ।
ધાતુઃ સુકૃતોલ્લાસં કરધૃતવીણાદિકં ચ યદ્રૂપમ્ ॥ ૨૦૯॥

કમલાસનદયિતા સા લસતુ પુરોઽસ્માકમાદરકૃતશ્રીઃ ।
યત્પ્રણમનાજ્જનાનાં કવિતોન્મેષઃ સદીડિતો ભવતિ ॥ ૨૧૦॥

પરસંવિદાત્મિકા સા મહિષી ધાતુઃ કલાવતી વાણી ।
શિશિરીકરોતિ તમાન્ કરુણારસદિગ્ધનેત્રપાલ્યા નઃ ॥ ૨૧૧॥

ધાતૃમનોરથપાત્રં સન્તપ્તસ્વર્ણકામ્યનિજગાત્રમ્ ।
આશ્રિતકમલજગોત્રં રક્ષિતનતબાહુચ્છાત્રમ્ ॥ ૨૧૨॥

કવિકુલજિહ્વાલોલં પિતામહાદૃતમનોજ્ઞનિજલીલમ્ ।
નિરસિતનતદુષ્કાલં વન્દે તેજઃ સદાલિનુતશીલમ્ ॥ ૨૧૩॥

મન્દાનામપિ મઞ્જુલકવિત્વરસદાયિની જનની ।
કાપિ કરુણામયી સા લસતુ પુરસ્તાત્ સદાસ્માકમ્ ॥ ૨૧૪॥

નિસ્તુલપદસમ્પ્રાપ્ત્યૈ ભૂયો ભૂયો નમાંસિ તે વાણિ ।
દીપકલામયિ ચાન્તઃસ્મરણં ધાતુઃ કુટુમ્બિન્યૈ ॥ ૨૧૫॥

માયાનિરાસકામો વન્દે વાણ્યાઃ પદામ્ભોજમ્ ।

સિદ્ધમનોરથશતકા યદ્ભજનેનાર્થિનઃ કાલે ॥ ૨૧૬॥

સતતં બદ્ધાઞ્જલિપુટમુપાસ્મહે તચ્છુભપ્રદં તેજઃ ।
યત્કમલજનયનાનાં પ્રમોદપીયૂષલહરિકામોદમ્ ॥ ૨૧૭॥

દિવિ વા ભુવિ દિક્ષુ જલે વહ્નૌ વા સર્વતો વાણિ ।
જન્તૂનાં કિલ રક્ષા ત્વધીના કીર્ત્યતે વિબુધૈઃ ॥ ૨૧૮॥

ભારતિ ભવતાપાર્તાન્ પાહિ કટાક્ષાઙ્કુરૈઃ શીતૈઃ ।
પરમનન્દવિધાતૃન્ યાનેવ સ્તૌતિ પદ્મવાસોઽપિ ॥ ૨૧૯॥

કુલદૈવતમસ્માકં તત્તેજઃ કુટિલકુન્તલં કિમપિ ।
કરધૃતપુસ્તકવીણં કલયે કામાગમોદયં ધાતુઃ ॥ ૨૨૦॥

પરમાનન્દઘનં તદ્ધાતુરપિ બ્રહ્મતત્ત્વરસદાયિ ।
આબ્રહ્મકીટનૃત્યત્સ્વવૈભવં જયતિ શારદારૂપમ્ ॥ ૨૨૧॥

વિબુધજનમોદજનની જનની નઃ સા વિધેઃ પત્ની ।
મૃદુસઞ્ચારવિલાસૈઃ શુભઙ્કુરી ભવતુ સન્તતં કાલે ॥ ૨૨૨॥

સરસમનોજ્ઞવિલાસૈઃ સ્વવશે કૃત્વા મનો વિધેર્વાણી ।
સૃષ્ટ્યાદૌ શુભલેખાકરી નૃણાં મસ્તકે માતા ॥ ૨૨૩॥

પ્રકૃતિમૃદુલં પદાબ્જં વાણીદેવ્યા મદીયચિત્તતટે ।
કામાદિસૂચિનિચિતે કથં સ્થિતિં પ્રાપ્નુયાત્ કાલે ॥ ૨૨૪॥

નિખિલચરાચરરક્ષાં વિતન્વતી પદ્મજપ્રિયા દેવી ।
મમ કુલદૈવતમેષા જયતિ સદારાધ્યમાન્યપદકમલા ॥ ૨૨૫॥

કુશલસમૃદ્ધ્યૈ ભૂયાદમ્બા સા શારદા દેવી ।
જનિરક્ષણાદિલીલાવિહારભાઙ્નિગમસૌધદીપકલા ॥ ૨૨૬॥

વાચાલયતિ કટાક્ષૈર્જડં શિલામલ્પજન્તું વા ।
યા વાણી સા શરણં ભવે ભવે પ્રાર્થ્યે શ્રિયઃપ્રાપ્ત્યૈ ॥ ૨૨૭॥

યદિ હિ પ્રસાદભૂમા વાણ્યાસ્તત્રૈવ સા હરેઃ કાન્તા ।
પરિલસિત ( ... incomplete ... ) નિત્યવાસરતા ॥ ૨૨૮॥

સનકસનન્દનવન્દ્યે કાન્તે પરમેષ્ટિનઃ શ્રિયઃપ્રાપ્ત્યૈ ।
વાણિ ત્વાં નૌમિ સદા ભવ પ્રસન્ના વિપ'ન્ચિલસિતકરે ॥ ૨૨૯॥

વાણિ વિપઞ્ચીકલરવરસિકે ગન્ધર્વયોષિદભિવન્દ્યે ।
તવ ચરણં મમ શરણં ભવવારિધિસુતેમમ્બ કલયામિ ॥ ૨૩૦॥

વાણિ કદાહં લપ્સ્યે ચરણામ્ભોજં ત્વદીયમિદમારાત્ ।
નિજમણિનૂપુરનાદસ્પૃહણીયવચઃપદં કલિતભક્તેઃ ॥ ૨૩૧॥

શ્રુતિપૂતમુખમનોહરલાવણ્યકુસુમમૃદુશરીરેયમ્ ।
નિજકરુણાપાઙ્ગસુધાપૂરણકૃતવૈભવા ભાતિ ॥ ૨૩૨॥

પરિસરનતવિબુધાલીકિરીટમણિકાન્તિવલ્લરીવિસરૈઃ ।
કૃતનીરાજનવિધિ તે મમ તુ શિરોભૂષણં હિ પદયુગલમ્ ॥ ૨૩૩॥

પ્રેમવતી વિધિભવને હંસગતિર્હંસયાનકૃતચારા ।
વાચામકૃત્રિમાનાં સ્થૈર્યવિધાત્રી મહેશાની ॥ ૨૩૪॥

આનન્દરૂપકોટીમમ્બાં તાં સન્તતં કલયે ।
સંવિદ્રૂપા યા કિલ વિધાતૃગેહે શ્રુતિશ્રિયં ધત્તે ॥ ૨૩૫॥

કમલજનેત્રમહોત્સવતારુણ્યશ્રીર્નિરસ્તનતશત્રુઃ ।
લલિતલિકુચાભકુચભરયુગલા દૃગ્વિજિતહરિણસન્દોહા ॥ ૨૩૬॥

કારુણ્યપૂર્ણનયના કલિકલ્મષનાશિની ચ સા વાણી ।
મુખજિતશારદકમલા વક્ત્રામ્ભોજે સદા સ્ફુરતુ માતા ॥ ૨૩૭॥

કમલસુષમાનિવાસસ્થાનકટાક્ષં ચિરાય કૃતરક્ષમ્ ।
રક્ષોગણભીતિકરં તેજો ભાતિ પ્રકામમિહ મનસિ ॥ ૨૩૮॥

કમલજતપઃફલં તન્મુનિજનહૃદયાબ્જનિત્યકૃતનૃત્તમ્ ।
કરુણાલોલાપાઙ્ગં તત્તેજો ભાતુ મમ મુખામ્ભોજે ॥ ૨૩૯॥

ભાગ્યં વિધિનયનાનાં સંસૃતિતાપજ્વરાદિતપ્તાનામ્ ।
ભેષજમેતદ્રૂપં કલાગ્રહં મન્યતે દેવ્યાઃ ॥ ૨૪૦॥

જનનિ કદા વા નેષ્યામ્યહમારાદર્ચિતત્વદીયપદઃ ।
નિમિષમિવ હન્ત દિવસાન્ દૃષ્ટ્વા ત્વામાદરેણ કલ્યાણીમ્ ॥ ૨૪૧॥

મઞ્જુલકવિતાસન્તતિબીજાઙ્કુરદાયિસારસાલોકા ।
જનનિ તવાપાઙ્ગશ્રીર્જયતિ જગત્ત્રાણકલિતદીક્ષેયમ્ ॥ ૨૪૨॥

અમ્બ તવાપાઙ્ગશ્રીરપાઙ્ગકેલીશતાનિ જનયન્તી ।
ધાતુર્હૃદયે જયતિ વ્રીડામદમોદકામસારકરી ॥ ૨૪૩॥

સર્વજગન્નુતવિભવે સન્તતમપિ વાઞ્છિતપ્રદે માતઃ ।
અધુના ત્વમેવ શરણં તેનાહં પ્રાપ્તજન્મસાફલ્યઃ ॥ ૨૪૪॥

શાન્તિરસસર્વશેવધિમમ્બાં સેવે મનોરથાવાપ્ત્યૈ ।
યામારાધ્ય સુરેશાઃ સ્વપદં પ્રાપુર્હિ તદ્રક્ષમ્ ॥ ૨૪૫॥

કુલજા ભાર્યા કીર્તિર્દાનં પુત્રાદયો યે ચ ।
સિધ્યન્તિ તે હિ સર્વે યસ્મૈ વાણી પ્રસન્ના સા ॥ ૨૪૬॥

કા ક્ષતિરમ્બ કટાક્ષે ન્યસ્તે સતિ મયિ વિરિઞ્ચિવરપત્નિ ।
ગઙ્ગાશુનકન્યાયાન્મહતી મમ વૃદ્ધિરીરિતા નિપુણૈઃ ॥ ૨૪૭॥

અવિરલદયાર્દ્રલોચનસેવનયા ધૂતતાપા હિ ।
પ્રતિકલ્પં સુરસઙ્ઘાસ્ત્વામભજન્ નુતિનતિપ્રમુખૈઃ ॥ ૨૪૮॥

દીનાનાં ચ કવીનાં વાણિ ત્વં કામધેનુરસિ માતઃ ।
સિદ્ધિસ્તેષામતુલા સુરમાન્યા તેન સઙ્કુલિતા ॥ ૨૪૯॥

સકલજગતાં હિ જનનીં વાણિ ત્વાં સન્તતમુપાસે ।
શ્રુતિસુદતીભૂષામણિમખિલાર્થપ્રાપ્ત્યૈ લોકે ॥ ૨૫૦॥

ધાતુઃ કુટુમ્બિની ત્વં સન્મઙ્ગલદાયિની સ્વમાહાત્મ્યાત્ ।
શ્વશ્રૂશ્વશુરમુખાદિપ્રીણનચતુરા ચ ભાસિ નિગમકલા ॥ ૨૫૧॥

મુખવિજિતચન્દ્રમણ્ડલમિદમમ્ભોરુહવિલોચનં તેજઃ ।
ધ્યાને જપે ચ સુદૃશાં ચકાસ્તિ હૃદયે કવીશ્વરાણાં ચ ॥ ૨૫૨॥

યસ્મૈ પ્રસન્નવદના સા વાણી લોકમાતા હિ ।
તસ્ય સહસા સહસ્રં લાભઃ સ્યાદ્ બાન્ધવાઃ સુખિનઃ ॥ ૨૫૩॥

તાપહરરસવિવર્ષણધૃતકુતુકા કાપિ નીલનલિનરુચિઃ ।
કાદમ્બિની પુરસ્તાદાસ્તાં નઃ સન્તતં જનની ॥ ૨૫૪॥

પદ્માક્ષનાભિપદ્મજદયિતે લોકામ્બ શારદેતિ સદા ।
તવ નામાનિ જપન્ સન્ ત્વદ્દાસોઽહં તુ મુક્તયે સિદ્ધઃ ॥ ૨૫૫॥

અમ્બાપ્રસાદભૂમ્ના નરો હિ ભુઙ્ક્તે સુખાનિ વિવિધાનિ ।
સ્મરે વિજયઃ કવિતાધનલક્ષ્મ્યાદેર્વિલાસલીલાદિઃ ॥ ૨૫૬॥

તીરં સંસૃતિજલધેઃ પૂરં કમલજવિલોચનપ્રીતેઃ ।

સારં નિગમાન્તાનાં દૂરં દુર્જનતતેર્હિ તત્તેજઃ ॥ ૨૫૭॥

અપિ દાસકુલે જાતઃ કટાક્ષભૂમ્ના વિધાતૃમુખપત્ન્યાઃ ।
જ્ઞાની ભવવારાશિં તરતિ ચ રાજ્યશ્રિયં ભુઙ્ક્તે ॥ ૨૫૮॥

સત્કૃતદેશિકપાદામ્બુજયુગલોઽહં નમામિ વાણિ ત્વામ્ ।
ત્વં તુ ગુરુમૂર્તિરુક્તા કાલે કાલે ચ કાઙ્ક્ષિતવિધાત્રી ॥ ૨૫૯॥

જ્ઞાનાનન્દમુખાદીનપવર્ગં વા દદાસિ ભક્તેભ્યઃ ।
અત એવાનન્યગતિસ્ત્વાં વિધિપત્નીં પ્રપદ્યેઽહમ્ ॥ ૨૬૦॥

ત્વયિ વિન્યસ્તભરાણાં ન હિ ચિન્તા જાયતે નૃણાં કાપિ ।
પરમાનન્દાદિકલાસ્ફૂર્તિર્દ્વિવિષદ્ગણેન સંમાન્યા ॥ ૨૬૧॥

સુમશરસામ્રાજ્યકલામઙ્ગલવિધિરેખિકા વાણી ।
ધાતુરપિ ચિત્તવૃત્તિસ્થૈર્યં ત્વન્યાદૃશં કુરુતે ॥ ૨૬૨॥

સા ધેનુશ્ચિન્તામણિરપિ વૃક્ષઃ સમ્પદાં પ્રદાયિન્યઃ ।
અમ્બ ત્વમેવ કાલે ભસિ જ્ઞાનપ્રદા વ્યપોહ્ય તમઃ ॥ ૨૬૩॥

મનસો નૈર્મલ્યપ્રદમસ્યાઃ સેવે કટાક્ષમહમારાત્ ।
યઃ કુરુતે જનતાં તાં હતમાયાં મધુરામયોધ્યાં ચ ॥ ૨૬૪॥

શરદિવ હંસકુલેડ્યા જ્યોત્સ્નેવ જનાર્તિહારિણી વાણ્યાઃ ।
જયતિ હિ કટાક્ષરેખા દીપકલેવ પ્રકામહતતિમિરા ॥ ૨૬૫॥

પઙ્કજભવવદનમણિં પરવિદ્યાદેવતાં વાણીમ્ ।
નિત્યં યજતાં જપતાં ન હિ તુલ્યોઽસ્મિન્ ક્ષમાતલે કશ્ચિત્ ॥ ૨૬૬॥

વાણી નિજવાણીભી રચયતિ નુતિમાત્તવીણયા કાલે ।
ધાતુઃ પ્રસાદહેતોઃ પતિવ્રતાલક્ષણૈરન્યૈઃ ॥ ૨૬૭॥

આનન્દયતિ વિલસૈરમ્બા પદ્માસનં નિજં દેવમ્ ।
તેનૈવ તુષ્ટહૃદયઃ શુભાક્ષરાણ્યાદરાલ્લિખતિ મૌલૌ ॥ ૨૬૮॥

મમ માનસદુર્મદગજમપારતાપાટવીષુ ધાવન્તમ્ ।
વિરચય્ય મુદિતચિત્તં કુરુ વાણિ ત્વત્પદાબ્જકૃતહસ્તમ્ ॥ ૨૬૯॥

કમલાસનધૈર્યમહીધરકુલિશસ્તે કટાક્ષ એવાયમ્ ।
કવિકુલમયૂરકાદમ્બિનીવિલાસો મુદેઽસ્તુ સતતં નઃ ॥ ૨૭૦॥

ગુરુવરદનામ્ભોજે નૃત્યન્તી શારદા દેવી ।
મધુરતરશ્લોકનિભા મણિનૂપુરનિનદસન્તતિર્ભિર્તિ ॥ ૨૭૧॥

કો વા ન શ્રયતિ બુધઃ શ્રેયોઽર્થી તામિમાં વાણીમ્ ।
યાં પઙ્કજાક્ષનાભિજસધર્મિણીમર્ચયન્તિ સુરનાથાઃ ॥ ૨૭૨॥

મુષિતપયોજમૃદિમ્ના ચરણતલેનાત્ર માનસે વાણી ।
પરિહરતુ પાપરાશિં સુરૌઘસંમાનિતેન કાલે મે ॥ ૨૭૩॥

યાથાર્થ્યજ્ઞાનકલાપ્રાપ્ત્યૈ ત્વાં શારદાં વન્દે ।
સેવાફલં પ્રયચ્છ પ્રસીદ પરમેશિ વલ્લભે ધાતુઃ ॥ ૨૭૪॥

નિગમાન્તસારમર્થં બોધયસિ ત્વં ગુરૂન્ પ્રકલ્પ્ય ભુવિ ।
સૈષા મે જ્ઞાનઘના વાણી નિત્યં પ્રસન્નાસિ ॥ ૨૭૫॥

મન્દારકુસુમમદહરમન્દસ્મિતમધુરવદનપઙ્કરુહા ।
હૃદ્યતમનિત્યયૌવનમણ્ડિતગાત્રી વિરાજતે વાણી ॥ ૨૭૬॥

સૌભાગ્યસૂચકાભી રેખાભિર્ભૂષિતં સૌરૈર્વન્દ્યમ્ ।
અમ્બાચરણપયોજં વતંસયન્ પ્રાપ્તસંમોદઃ ॥ ૨૭૭॥

દ્વિજગણપૂજ્યં નિત્યં નિરસ્તજાડ્યં ત્વદીયપાદયુગમ્ ।
ક્ષણમપિ વા સાંનિધ્યં ભજતુ મદીયે હૃદિ સ્વૈરમ્ ॥ ૨૭૮॥

નતદેવરાજમકુટીમણિઘૃણિપરિચુમ્બિતાઙ્ઘ્રિકમલા નઃ ।
કમલાસનસ્ય દયિતા તન્યાદન્યાદૃશી શ્રિયં ભજતામ્ ॥ ૨૭૯॥

વાણી શ્રિતકાદમ્બા દમ્ભાદિરિપૂન્ નિરસ્ય નઃ કાલે ।
ક્ષેમમવન્યાં તન્યાત્ પદે પરે દેવસઙ્ઘપરિસેવ્યે ॥ ૨૮૦॥

પઙ્કજભવસામ્રાજ્યસ્થિરલક્ષ્મીશ્ચપાણ્ડરતનુશ્રીઃ ।
નતમાનવસુકૃતકલાપરિપાટી ભાતિ સકલગુણપેટી ॥ ૨૮૧॥

મુખવિજિતચન્દ્રબિમ્બા સામ્બા કાદમ્બસેવ્યપદકમલા ।
કમલાસનગૃહલક્ષ્મીર્લક્ષ્મીં પુષ્ણાતુ શારદા દેવી ॥ ૨૮૨॥

મુરમથનસ્યેવ રમા શમ્ભોરિવ સકલભૂધરેન્દ્રસુતા ।
વાણિ વિધાતુઃ સદનેઽનુરૂપદામ્પત્યસમ્પદા ભાસિ ॥ ૨૮૩॥

વાણિ તવ દેહકાન્ત્યા કટાક્ષલહરી તુ સંયુતા કાલે ।
ધત્તે કામપિ શોભાં સુરસ્રવન્ત્યેવ સઙ્ગતા યમુના ॥ ૨૮૪॥

મધુરાસેચનદૃષ્ટ્યા માં પાયાદાપદો મુહુર્વાણી ।
આશ્રિતતાપવિભેત્રીત્યેવં યામામનન્તિ સૂરિવરાઃ ॥ ૨૮૫॥

અજ્ઞાતકોપપૂરા યસ્યા દૃષ્ટિઃ કૃતાદરા ભજતામ્ ।
સૈષા વિહસિતપૌરન્દરલક્ષ્મીં સમ્પદં દદ્યાત્ ॥ ૨૮૬॥

બાલકુરઙ્ગવિલોચનમીષત્સ્મિતમધુરમાનનં વાણ્યાઃ ।
મણિમયતાટઙ્કમણીવિલાસિ ભૂયાન્મુદેઽસ્માકમ્ ॥ ૨૮૭॥

મુનિજનમાનસહંસીં શ્રુતિતતિપઞ્જરશુકીં મહાદેવીમ્ ।
નૌમિ સ્નુષાં રમાયાઃ માહેશ્વરમહિતસત્પદપ્રાપ્ત્યૈ ॥ ૨૮૮॥

ધાતુઃ સૌધાઙ્ગણકૃતચઙ્ક્રમણાં શારદાં નૌમિ ।
મત્તમતઙ્ગજગમનાં પરિપન્થિજયાય સુકૃતિસન્દૃશ્યામ્ ॥ ૨૮૯॥

વાગીશમુખા દેવા યસ્યાઃ પ્રસદનબલદ્ધિ વિજયન્તે ।
પરિપાલિતભક્તગણા યદ્ધ્યાનોલ્લસદપારપુલકાન્તાઃ ॥ ૨૯૦॥

નૈસર્ગિકવાક્શ્રેણીકેલિવનમમલભૂષણં ધાતુઃ ।
વદનાનામિયમમ્બા જયતુ ચિરં કામવર્ષિણી ભજતામ્ ॥ ૨૯૧॥

કલયામિ હૃદયમેતત્ પાદાબ્જે શારદાદેવ્યાઃ ।
પ્રાપ્તારિષટ્કવિજયં તત્ત્વધનં કલિતશારદાધ્યાનમ્ ॥ ૨૯૨॥

પાદારવિન્દનમનપ્રભાવપરિકલિતદેવસારૂપ્યાઃ ।
પરમાનન્દનિમગ્નાઃ સુધિયો ભાન્તિ ક્ષમાવલયે ॥ ૨૯૩॥

લલિતવિધાતૃરૂપં પાલિતલોકત્રયં ચ તત્ તેજઃ ।
સકલાગમશિખરકલાપરતત્ત્વં શારદારૂપમ્ ॥ ૨૯૪॥

ધ્યાનૈર્યોગૈશ્ચ જપૈર્યત્ સેવ્યં પરમમાદિષ્ટમ્ ।
તન્નશ્ચકાસ્તુ હૃદયે વિશ્વજનીનં હિ ભક્તાનામ્ ॥ ૨૯૫॥

ભાગીરથીવ વાણી તવ નુતિરૂપા વિરાજતે પરમા ।
ઇહ માતર્યદ્ભજનં સર્વેષાં સર્વસમ્પદાં હેતુઃ ॥ ૨૯૬॥

સન્તતમધુરાલાપૈર્લાલિતવિધિવૈભવૈરમેયકલૈઃ ।
શ્રેયઃપ્રદાનદીક્ષિતકટાક્ષપાતૈર્મહાતત્ત્વૈઃ ॥ ૨૯૭॥

ખેલલ્લોલમ્બકચૈઃ કુચભરનમ્રૈઃ પુરન્ધ્રિગુણપૂર્ણૈઃ ।

આશ્રિતસંવિત્પીઠૈરમરેશવધૂકરાદૃતચ્છત્રૈઃ ॥ ૨૯૮॥

વીણાપુસ્તકહસ્તૈર્વિધિભાગ્યૈરસ્તુ મમ તુ સારૂપ્યમ્ ।
સંવિદ્ધનૈશ્ચ વાણીરૂપૈરેતૈર્દયાસારૈઃ ॥ ૨૯૯॥

માતઃ કથં નુ વર્ણ્યસ્તવ મહિમા વાણિ નિગમચયવેદ્યઃ ।
ઇતિ નિશ્ચિત્ય પદાબ્જં તવ વન્દે મોક્ષકામોઽહમ્ ॥ ૩૦૦॥

ત્વામમ્બ બાલિશોઽહં ત્વચમત્કારૈર્ગિરાં ગુમ્ભૈઃ ।
અયથાયથક્રમં હિ સ્તુવન્નપિ પ્રાપ્તજન્મસાફલ્યઃ ॥ ૩૦૧॥

ઇતિ શ્રીશારદાત્રિશતી સમાપ્તા

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*Sharada Trishati*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*